सूचना—आ पुस्तक शुद्धिपत्र प्रमाणे प्रथम सुधारीने वांचशो.

# शुद्धिपत्रम्.

| पृष्ट | श्लोक | अशुद्ध | शुद्ध | पृष्ट | श्लोक | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|---|---|
| ३ | १९ | प्युत्तमां | प्युत्तमा | ११ | १०१ | नुनु | ननु |
| ३ | १९ | विद्यां | विद्या | १२ | १०२ | मीदृसम् | मीदृशम् |
| ३ | २५ | नंत् | नं | १२ | १०८ | दृद्ध | दृद्धा: |
| ३ | २५ | त्यजे | त्यजेत् | १२ | ११० | कश्चनः | कश्चन |
| ४ | ३४ | प्रति | पति | १५ | १३२ | उद्दधा | उदूधा |
| ४ | ३५ | क्व | च्च | १५ | १३४ | ज्ञन | ज्ञान |
| ४ | ३५ | रुष्टा | रुष्टाः | १५ | १३४ | गुर्वी | गुर्वी |
| ५ | ३७ | श्वभिः | श्वभिः | १८ | १५९ | उपाजि | उपार्जि |
| ५ | ४१ | र्थिनः | र्थिनः | १८ | १६१ | तत्रव | तत्रैव |
| ७ | ५५ | व्य | व्यं | १९ | १६९ | मूषिको | मूषको |
| ७ | ५५ | नं | न | १९ | १७० | लाके | लोके |
| ७ | ६० | तुष्टाचश्च | तुष्टाश्च | २० | १८१ | माण्डिता | मण्डिता |
| ७ | ६० | ज्ञा च | ज्ञाश्च | २१ | १९५ | भवती | भवति |
| १० | ८७ | पितगुणैः | पितैर्गुणैः | २२ | २०१ | सम्पणोति | सग्णोति |

| पृष्ट. | श्लोक. | अशुद्ध. | शुद्ध. |
|---|---|---|---|
| २३ | २०९ | पायते | पीयते |
| २५ | २२७ | कार्थ | कोर्थ |
| २७ | २४७ | नदि | नदी |
| ३० | २६३ | नृपतिर्वि | नृपतिर्विं |
| ३० | २६४ | अक्षश्चा | अक्षैश्चा |
| ३३ | २७६ | कीति | कीर्ति |
| ३४ | २८० | यावच्चै | यावच्चे |
| ३४ | २८३ | साहायश्च | सहायाश्च |
| ३५ | २८५ | क्कचि | क्वचि |
| ३६ | २९१ | पुरुषष्य | पुरुषस्य |
| ३८ | २९९ | स्वादुच | स्वादुचे |
| ३८ | २९९ | प्रकृतिवि | प्रकृतिर्विं |
| ३८ | २९९ | सज्ञना | सज्जना |
| ४२ | ३२१ | ।जतानि | जितानि |
| ४३ | ३२८ | बगमा | वगमो |
| ४४ | ३३९ | दुर्लभं | दुर्लभं |
| ४४ | ३४३ | त्रिवर्ग्ग | त्रिवर्ग |
| ४४ | ३४३ | धर्म्म | धर्म |
| ४५ | ३४६ | विक्रीयं | विक्रीय |
| ४५ | ३४९ | सप्तार्च्चि | सप्तार्चि |
| ४६ | ३५३ | करुते | कुरुते |
| ४६ | ३५५ | क्षाणात् | क्षणात् |
| ४७ | ३५८ | नोर्जितं | नार्जितम् |
| ४७ | ३६० | कल्पतरु | कल्पतरु |
| ४८ | ३६५ | रायातः | शयातो |
| ४८ | ३६५ | काल | कालः |
| ४८ | ३६८ | वितं | वित्तं |
| ४८ | ३७१ | दुःख | दुःख |

श्री जिनेश्वराय नमः

# संस्कृत काव्यानंद.

## भाग १ लो.

---

ओंकारं बिंदु संयुक्तं, नित्यं ध्यायन्ति योगिनः
कामदं मोक्षदं चैव, ओंकाराय नमोनमः १
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता २
जीवन्तोऽपि मृताः पंच व्यासेन परिकीर्तिताः
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ३
उदारस्य तृणं वित्तं शूरस्य मरणं तृणम्
विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ४
अमंत्रमक्षरं नास्ति नास्ति मूलमनैाषधम्
अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ५
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः
स हेतुः सर्वविद्यानां धर्मस्यच धनस्यच ६

को न याति वशं लोके मुखे पिण्डेन पूरितः
मृदंगो मुखलेपेन करोति मधुरध्वनिम्. ७
सप्तैतानि न पूर्यन्ते पूर्यमाणान्यनेकशः
ब्राह्मणोऽग्निर्यमो राजा पयोधिरुदरं गृहम्. ८
परोपि हितकृद्वन्धुः बन्धुरप्यहितः परः
अहितो देहजो व्याधिः हितमारण्यमौषधम् ९
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम्
शास्त्रपूतं वदेद्वाक्यं मनःपूतं समाचरेत् १०
शोभन्ते विद्यया विप्राः क्षत्रिया विजयश्रिया
श्रियोऽनुकूलदानेन लज्जया च कुलांगनाः ११
अश्वं नैव गजं नैव व्याघ्रं नैवच नैवच
अजापुत्रं बलिं दद्यात् देवो दुर्बलघातकः. १२
भवन्ति नरकाः पापात् पापं दारिद्र्यसंभवम्
दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् १३
वनानि दहतो वह्नेः सखा भवति मारुतः
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् १४
निःसारस्य पदार्थस्य प्रायेणाडंबरो महान्
नहि तादृग् ध्वनिः स्वर्णे यादृक् कांस्ये प्रजायते १५
जानीयात् संगरे भृत्यान् बान्धवान् व्यसनागमे

आपत्काले तु मित्राणि भार्यां च विभवक्षये १६
पिपीलिकार्जितं धान्यं मक्षिकासंचितं मधु
लुब्धेनोपार्जितं द्रव्यं समूलं च विनश्यति १७
मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च
असतां संप्रयोगेन पंडितोप्यवसीदति. १८
विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्
नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि १९
लुब्धमर्थेन गृह्णीयात् क्रुद्धमंजलिकर्मणा
मूर्खं छंदानुरोधेन तत्वार्थेन च पण्डितम् २०
वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः
आगतं समयं वीक्ष्य भिन्द्याद्घटमिवाश्मना २१
सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः
अर्धेन कुरुते कार्यं सर्वनाशो न जायते २२
उत्तमा आत्मनाख्याताः पितुः ख्याताश्च मध्यमाः
अधमा मातुलाख्याताः श्वशुराश्चाधमाधमाः २३
न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम्
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते २४
चलत्येकेन पादेन तिष्ठत्यन्येन पंडितः
नापरीक्ष्य परं स्थानं पूर्वमायतनं त्यजे २५

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति
अतः श्वःकरणीयानि कुर्यादद्यैव बुद्धिमान् २६
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च
बंचनं चापमानं च मतिमान्न प्रकाशयेत् २७
अवृत्तिकं त्यजेद्देशं वृत्तिं सोपद्रवां त्यजेत्
त्यजेन्मायाविनं मित्रं धनं प्राणहरं त्यजेत् २८
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् २९
चिन्तनीया हि विपदामादावेव प्रतिक्रियाः
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ३०
पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम्
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ३१
न द्विषन्ति न याचन्ते परनिन्दां न कुर्वते
अनाहूता न चायान्ति तेनाश्मानोऽपि देवताः ३२
उपभोक्तुं न जानाति श्रियं प्राप्यापि मानवः
आकंठं जलमग्नोऽपि श्वा हि लेढ्येव जिह्वया ३३
आर्ता देवान् नमस्यन्ति तपः कुर्वन्ति रोगिणः
अधना दातुमिच्छन्ति वृद्धा नारी पतिव्रता ३४
क्वचिद्रुष्टाः क्वचित्तुष्टा स्तुष्टा रुष्टा क्षणेक्षणे

अव्यवस्थितचित्तानां प्रसादोऽपि भयंकरः ३५
निर्विषेणापि सर्पेण कर्तव्या महती फणा
विषमस्तु नचाप्यस्तु खटाटोपो भयंकरः ३६
एक एव पदार्थस्तु त्रिधा भवति वीक्षितः
कामिनी कुणपं मांसं कामिभिर्योगिभिः श्वभिः ३७
शैले शैले न माणिक्यं मैाक्तिकं न गजे गजे
साधवो नहि सर्वत्र चन्दनं न वने वने ३८
यश्च मूढतमो लोके यश्च बुद्धेः परं गतः
तावुभैा सुखमेधेते क्लिश्यत्यन्तरितो जनः ३९
साक्षरा विपरीताश्चेद्राक्षसा एव केवलम्
सरसो विपरीतश्चेत् सरसत्वं न मुंचति ४०
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम्
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ४१
माता यदि विषं दद्यात् विक्रीणाति पिता सुतं
राजा हरति सर्वस्वं तत्र का परिवेदना ४२
धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ४३
मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्
आत्मवत्सर्वभूतेषु यः पश्यति स पश्यति ४४

दिवा पश्यति नोलूकः काको नक्तं न पश्यति
अपूर्वः कोऽपि कामान्धो दिवा नक्तं न पश्यति ४५
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ४६
पिण्डे पिण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः
जातौ जातौ नवाचारा भिन्ना वाणी मुखे मुखे ४७
मर्कटस्य सुरापानं तत्र वृश्चिकदंशनम्
तन्मध्ये भूतसंचारो यद्वा तद्वा भविष्यति ४८
पुस्तकस्था तु या विद्या परहस्तगतं धनं
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ४९
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ५०
विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषुच
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्यच ५१
अगाधजलसंचारी न गर्वं याति रोहितः
अंगुष्ठोदकमात्रेण शफरी फर्फरायते ५२
नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि
कुशकंटकविद्धोपि प्राप्तकालो न जीवति ५३
लालयेत्पंच वर्षाणि दश वर्षाणि ताडयेत्

प्राप्तेतु षोडशे वर्षे पुत्रे मित्रवदाचरेत् ५४
कर्तव्यमेव कर्तव्यं प्राणैः कंठगतैरपि
अकर्तव्य नं कर्तव्यं प्राणैः कंठगतैरपि ५५
अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते
निराश्रया न शोभन्ते पण्डितावनितालताः ५६
लालने बहवो दोषास्ताडने बहवो गुणाः
तस्मात्पुत्रंच शिष्यंच ताडयेन्नतु लालयेत् ५७
वक्तारः किं करिष्यन्ति श्रोता यत्र न विद्यते
नग्नक्षपणके देशे रजकः किं करिष्यति ५८
कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्
को विदेशः सुविद्यानां कः परः प्रियवादिनाम् ५९
असन्तुष्टा द्विजा नष्टाः सन्तुष्टाचश्च महीभुजः
सलज्जा गणिका नष्टा निर्लज्जा च कुलांगनाः ६०
प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ६१
शोकस्थानसहस्राणि भयस्थानशतानि च
दिवसे दिवसे मूढमाविशन्ति न पंडितम् ६२
शत्रुर्दहति संयोगे वियोगे मित्रमप्यहो
उभयोर्दुःखदायित्वात् को भेदः शत्रुमित्रयोः ६३

काव्यशास्त्रविनोदेन कालो गच्छति धीमतां
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ६४
हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः
नीरक्षीरपरीक्षायां हंसो हंसो बको बकः ६५
येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ६६
यूयं वयं वयं यूयमित्यासीन्मतिरावयोः
किं जातमधुना येन यूयं यूयं वयं वयम् ६७
यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत्
यद्यदात्मवशं तु स्यात् तत्तत्सेवेत यत्नतः ६८
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ६९
क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्
अपराधिषु सत्वेषु नृपाणां सैव दूषणम् ७०
सेवितव्यो महान् वृक्षः फलच्छायासमन्वितः
दैवाद्यदि फलं नास्ति छाया केन निवार्यते ७१
मित्रद्रोही कृतघ्नश्च तथा विश्वासघातकः
त्रयस्ते नरकं यान्ति यावच्चन्द्रदिवाकरौ ७२
जनिता चोपनेता च यश्च विद्यां प्रयच्छति

अन्नदाता भयत्राता पंचैते पितरः स्मृताः ७३
नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ७४
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः
येषां हृदिस्थो भगवान् मंगलायतनं हरिः ७५
उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः
नहि सिंहस्य सुप्तस्य प्रविशन्ति मुखे गजाः ७६
उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः
षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत् ७७
आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ७८
अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ७९
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्
एवं पुरुषकारेण विना दैवं न सिध्यति ८०
योजनानां सहस्रन्तु शनैर्गच्छेत्पिपीलिका
अगच्छन् वैनतेयोपि पदमेकं न गच्छति ८१
गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सतां
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः ८२

गुणवज्जनसंसर्गाद्याति स्वल्पोऽपि गैारवम्
पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते ८३
गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः
वासुदेवं नमस्यन्ति वसुदेवं न वै जनाः ८४
यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्
नहि कस्तूरिकामोदः शपथेन निवार्यते ८५
गुणैर्गैारवमायाति नोच्चैरासनमास्थितः
प्रासादशिखरारूढः काकः किं गरुडायते ८६
परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत्
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितर्गुणैः
महानुभावसंसर्गः कस्य नोन्नतिकारकः
रथ्याम्बु जाह्नवीसंगात् त्रिदशैरपि वन्द्यते ८८
हीयते हि मतिस्तात हीनैःसह समागमात्
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ८९
परोपकारशून्यस्य धिङ्मनुष्यस्य जीवितम्
धन्यास्ते पशवो येषां चर्माप्युपकरोति हि. ९०
आत्मार्थं जीवलोकेस्मिन् को न जीवति मानवः
परं परोपकारार्थं यो जीवति स जीवति ९१
उपकर्तुं यथा स्वल्पः समर्थो न तथा महान्

प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ९२
संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम्
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ९३
अकृत्वा परसंतापं अगत्वा खलमंदिरम्
अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु ९४
सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसं
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ९५
वलिभिर्मुखमाक्रान्तं पलितैरंकितं शिरः
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ९६
आशा नाम मनुष्याणां काचिदाश्चर्यशृंखला
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत् ९७
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम्
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलंबितम् ९८
अनुकूले विधौ देयं यतः पूरयिता हरिः
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति ९९
यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि १००
लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया
दातापि विसृजत्यर्थं तयैव ननु शंकया १०१

भिक्षुका नैव भिक्षंते बोधयन्ति गृहे गृहे
दीयतां दीयतां नित्यमदातुः फलमीदृसम् १०२
शतेषु जायते शूरः सहस्रेषु च पंडितः
वक्ता दशसहस्रेषु दाता भवति वा न वा १०३
वेपथुर्मलिनं वक्त्रं दीना वाक् गद्गदः स्वरः
मरणे यानि चिह्नानि तानि चिह्नानि याचके १०४
तृणादपि लघुस्तूलः तूलादपि च याचकः
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति १०५
काक आह्वयते काकान् याचको न तु याचकान्
काकयाचकयोर्मध्ये वरं काको न याचकः १०६
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः
यस्यार्थाः स पुमांल्लोके यस्यार्थाः सहि पंडितः १०७
वयोवृद्धा स्तपोवृद्धा ये च वृद्धा बहुश्रुताः
ते सर्वे धनवृद्धनां द्वारि तिष्ठन्ति किंकराः १०८
स्त्रीरूपं मोहकं पुंसो यून एव भवेत्क्षणम्
कनकं स्त्रीबालवृद्ध षंढानामपि सर्वदा १०९
हे दारिद्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चनः ११०
परोपदेशे पांडित्यं सर्वेषां सुकरं नृणाम्

धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः १११
यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः
चित्ते वाचि क्रियायांच साधूनामेकरुपता ११२
उपकारिषु यः साधुः साधुत्वे तस्य को गुणः
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ११३
खलः सर्षपमात्राणि परच्छिद्राणि पश्यति
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ११४
उपकारोऽपि नीचानामपकाराय जायते
पयःपानं भुजंगानां केवलं विषवर्धनम् ११५
अलंकरोति हि जरा राजामात्यभिषग्यतीन्
विडंबयति पण्यस्त्री मल्लगायकसेवकान् ११६
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ११७
तादृशी जायते बुद्धिर्व्यवसायोपि तादृशः
सहायास्तादृशाश्चैव यादृशी भवितव्यता ११८
अवश्यंभाविभावानां प्रतीकारो भवेद्यदि
तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ११९
नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी
गुणीच गुणरागीच विरलः सरलो जनः १२०

उदये सविता रक्तो रक्तश्चास्तमये तथा
संपत्तौ च विपत्तौ च महतामेकरूपता १२१
आरभन्तेल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च
महारंभाः कृतधियः तिष्ठन्ति च निराकुलाः १२२
एकेनापि सुपुत्रेण सिंही स्वपिति निर्भया
सहैव दशभिः पुत्रै र्भारं वहति गर्दभी १२३
अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः
सकृदुःखकरावाद्यावन्तिमस्तुपदे पदे १२४
सुलभाः पुरुषा राजन् सततं प्रियवादिनः
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः १२५
राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः
लोकास्तमनुवर्तन्ते यथा राजा तथा प्रजा १२६
यत्रात्मीयो जनो नास्ति भेदस्तत्र न विद्यते
कुठारैर्दण्डनिर्मुक्तैर्भिद्यन्ते तरवः कथम् १२७
सर्वे यत्र विनेतारः सर्वे पण्डितमानिनः
सर्वे महत्वमिच्छन्ति कुलं तदवसीदति १२८
कृतार्थः स्वामिनं द्वेष्टि कृतदारस्तु मातरम्
जातापत्या पतिं द्वेष्टि गतरोगश्चिकित्सकम् १२९
अहो दुर्जनसंसर्गान्मानहानिः पदे पदे

पावको लोहसंगेन मुद्गरैरभिहन्यते १३०
को देशः कानि मित्राणि कः कालः कैा व्ययागमैा
कश्चाहं काच मे शक्ति रिति चिन्त्यं मुहुर्मुहुः १३१
उदघाटित नवद्वारे पंजरे विहगोऽनिलः
यत्तिष्ठति तदाश्चर्यं प्रयाणे विस्मयः कुतः १३२
प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया
तृप्ताः कामेन बाध्यन्ते प्राणिनो निशि निद्रया १३३
विद्वानेव विजानाति विद्वज्जनपरिश्रमम्
नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् १३४
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति १३५
नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति
स एव प्रच्युतः स्थानात् शुनापि परिभूयते १३६
स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः
इति संचिन्त्य मतिमान् स्वस्थानं न परित्यजेत् १३७
आदरेण यथा स्तैाति धनवन्तं धनेच्छया
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् १३८
स्वमस्तकसमारूढं मृत्युं पश्येज्जनो यदि
आहारोऽपि न रोचेत, किमुतान्या विभूतयः १३९

मृत्योर्बिभेषि किं मूढ, भीतं मुंचति किं यमः
अजातं नैव गृह्णाति कुरु यत्नमजन्मनि १४०
अशनं मे वसनं मे जाया मे बन्धुवर्गो मे
इति मे मे कुर्वाणं, कालवृको हन्ति पुरुषाजं १४१
अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः १४२
अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम् ।
विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम् १४३
धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते
अजागलस्तनस्येव तस्य जन्म निरर्थकम् १४४
माता शत्रुः पिता वैरी येन बालो न पाठितः
न शोभते सभामध्ये हंसमध्ये बको यथा १४५
रूपयौवनसंपन्ना विशालकुलसंभवाः
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः १४६
मूर्खोऽपि शोभते तावत्सभायां वस्त्रवेष्टितः
तावच्च शोभते मूर्खो यावत्किंचिन्न भाषते १४७
काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम्
तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् १४८
कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः

अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः १४९
अयं निजः परो वेति गणना लघुचेतसाम्
उदारचरितानां तु वसुधैव कुटुम्बकम् १५०
उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः १५१
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् १५२
साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम्
नहि तापयितुं शक्यं सागराम्भस्तृणोल्कया १५३
दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन्
मणिना भूषितः सर्पः किमसौ न भयंकरः १५४
नारिकेलसमाकारा दृश्यन्ते हि सुहृज्जनाः
अन्ये बदरिकाकारा बहिरेव मनोहराः १५५
घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः १५६
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः
यस्यार्थाः स पुमांल्लोके यस्यार्थाः स हि पण्डितः १५७
संसारविषवृक्षस्य द्वे एव रसवत्फले
काव्यामृतरसास्वादः संगमः सुजनैः सह १५८

उपार्जितानां वित्तानां त्याग एव हि रक्षणम्
तडागोदरसंस्थानां परीवाह इवाम्भसाम् १५९

राजा कुलवधूर्विप्रा मन्त्रिणश्च पयोधराः
स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः १६०

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः १६१

सन्त एव सतां नित्यमापदुद्धरण क्षमाः
गजानां पङ्कमग्नानां गजा एव धुरंधराः १६२

अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम्
स्वभूमिः श्वापदादीनां राज्ञां मन्त्री परं बलम् १६३

अधोऽधः पश्यतः कस्य महिमा नोपचीयते
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति १६४

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः
विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता १६५

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः १६६

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये
पयः पानं भुजगानां केवलं विषवर्धनम् १६७

सर्व एव जनः शूरो ह्यनासादितविग्रहः

अदृष्टपरसामर्थ्यः सदर्पः को भवेन्नहि　　१६८
नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा　　१६९
यथाखरश्चंदन भारवाही, भारस्यवेत्तानतु चंदनस्य
एवंहिशास्त्राणि बहून्यधीत्य, चार्थेषुमूढाःखरवद्वहंति १७०
न दुर्जनः सज्जनता मुपैति, बहु प्रकारै रपि सेव्य मानः
अत्यंत सिक्तःपयसाघृतेन, ननिंब वृक्षो मधुता मुपैति १७१
कृशोपिसिंहो नसमोगजेंद्रैः, सत्वं प्रधानंनतु मांस राशिः
अनेकवृंदानि वनेगजानां, सिंहस्यनादेन मदंत्यजंति १७२
यत्नेन पापानि समाचरंति, धर्मं प्रसंगादपि नाचरंति
आश्चर्यमेतद्धि मनुष्यलोके, क्षीरं परित्यज्य विषंपिबंति १७३
अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः
ज्ञानलवदुर्विदग्धं, ब्रह्मापितं नरं न रञ्जयति　　१७४
येषां न बिद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः
ते मृत्युलोके भुवि भारभूता, मनुष्यरूपेण मृगाश्चरन्ति १७५
दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य
यो न ददाति न भुङ्क्ते तस्य तृतीया गति भंवति १७६
अकरुणत्वमकारणविग्रहः, परधने परयोषिति च स्पृहा
स्वजनबन्धुजनेष्वसहिष्णुता, प्रकृतिसिद्धमिदं हि दुरात्मनाम्.

आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्
दिनस्य पूर्वार्धपरार्धभिन्ना,छायेव मैत्री खलसज्जनानाम् १७८
विपदि धैर्यमथाभ्युदये क्षमा, सदसि वाक्पटुता युधि विक्रमः
यशसि चाभिरुचिर्व्यसनं श्रुतौ,प्रकृतिसिद्धमिदं हि महात्मनाम्
भवन्ति नम्रास्तरवः फलोद्गमै,र्नवाम्बुभिर्भूमिविलम्बिनोघनाः
अनुद्धताःसत्पुरुषाःसमृद्धिभिः,स्वभाव एवैष परोपकारिणाम्.
अप्रियवचनदरिद्रैः, प्रियवचनाढयैः स्वदारपरितुष्टैः
परपरिवादनिवृत्तैः, क्वचित्क्वचिन्माण्डिता वसुधा १८१
अतिपरिचयादवज्ञा, संततगमनादनादरो भवति
लोकः प्रयागवासी, कूपे स्नानं समाचरति १८२
अतिपरिचयादवज्ञा, इति यद्वाक्यं मृषैव तद्भाति
अतिपरिचितेप्यनादौ, संसारेऽस्मिन् न जायतेऽवज्ञा १८३
साहित्यसंगीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः
तृणं न खादन्नपि जीवमान, स्तद्भागधेयं परमं पशूनाम् १८४
देशाटनं पण्डितमित्रताच, वारांगनाराजसभाप्रवेशः
अनेकशास्त्रार्थविलोकनं च, चातुर्यमूलानि भवन्ति पंच १८५
क्षते प्रहारा निपतन्त्यभीक्ष्णं, धनक्षये वर्धति जाठराऽग्निः
आपत्सु वैराणि समुद्भवन्ति, छिद्रेष्वनर्था बहुलीभवन्ति १८६
एको देवः केशवो वा शिवो वा, एकं मित्रं भूपतिर्वा यतिर्वा

एको वासः पत्तने वा वने वा, एका भार्या सुन्दरी वा दरी वा.
यःपरस्य विषमं विचिन्तयेत्,प्राप्नुयात्स कुमतिः स्वयंहि तत्
पूतना हरिवधार्थमाययौ, प्राप सैव वधमात्मनस्ततः १८८
मांसं मृगाणां दशनौ गजानां, मृगद्विषां चर्म फलं द्रुमाणाम्
स्त्रीणां सुरूपंच नृणां हिरण्यं, एते गुणा वैरकरा भवन्ति १८९
विरला जानन्ति गुणान्, विरलाः कुर्वन्ति निर्धने स्नेहम्
विरलाः परकार्यरताः, परदुःखेनापि दुःखिता विरलाः १९०
दधि मधुरं मधु मधुरं, द्राक्षा मधुरा सुधापि मधुरैव
तस्य तदेव हि मधुरं, यस्य मनो यत्र संलग्नम् १९१
मृगा मृगैः संगमनुव्रजन्ति, गावश्च गोभिस्तुरगास्तुरंगैः
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,समानशीलव्यसनेषु सख्यम्.
आपदि मित्रपरीक्षा, शूरपरीक्षा रणांगणे भवति
विनये वंशपरीक्षा, स्त्रियः परीक्षा तु निर्धने पुंसि १९३
प्राप्य चलानधिकारान्, शत्रुषु मित्रेषु बन्धुवर्गेषु
नापकृतं नोपकृतं, न सत्कृतं किं कृतं तेन १९४
अबला यत्र प्रबला, बालो राजा निरक्षरो मन्त्री
नहि नहि तत्र धनाशा, जीवितुमाशापि दुर्लभा भवती १९५
दरिद्रता धीरतया विराजते, कुरूपता शीलगुणैर्विराजते
कुभोजनं चोष्णतया विराजते, कुवस्त्रता शुभ्रतया विराजते.

यथा चतुर्भिः कनकं परीक्ष्यते, निघर्षणच्छेदनतापताडनैः
तथा चतुर्भिः पुरुषः परीक्ष्यते, श्रुतेन शीलेन गुणेन कर्मणा १९७
मात्रासमं नास्ति शरीरपोषणं, चिन्तासमं नास्ति शरीरशोषणम्
भार्यासमं नास्ति शरीरतोषणं, विद्यासमं नास्ति शरीरभूषणम्.
सहसा विदधीत न क्रिया, मविवेकः परमापदां पदम्
वृणुते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव संपदः १९९
अमितगुणोऽपि पदार्थो, दोषेणैकेन निन्दितो भवति
निखिलरसायनमहितो, गन्धेनोग्रेण लशुन इव २००
गवाशनानां श शृणोति वाक्यं, अहंहि राजन् वचनं मुनीनाम्
न चास्य दोषो नचमद्गुणोवा, संसर्गजा दोषगुणाभवन्ति २०१
असज्जनः सज्जनसंगिसंगात्, करोति दुःसाध्यमपीह साध्यम्
पुष्पाश्रयाच्छंभुशिरोऽधिरूढा, पिपीलिकाचुंबतिचन्द्रबिंबं २०२
श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्नतु कंकणेन
विभाति कायः करुणापराणां, परोपकारैर्नतु चंदनेन २०३
परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः
परोपकाराय दुहन्ति गावः, परोपकारार्थमिदं शरीरम् २०४
आशाया ये दासा, स्ते दासाः सन्ति सर्वलोकस्य
आशा येषां दासी, तेषां दासायते लोकः २०५
दानेन भूतानि वशीभवन्ति, दानेन वैराण्यपि यान्ति नाशम्

परोपि बन्धुत्वमुपैति दानै, दानं हि सर्वव्यसनानि हन्ति२०६
यस्यास्ति वित्तं स नरः कुलीनः, स पंडितः स श्रुतवान् गुणज्ञः
स एव वक्ता स च दर्शनीयः,सर्वे गुणाः कांचनमाश्रयन्ते २०७
त्यजन्ति मित्राणि धनैर्विहीनं, पुत्राश्च दाराश्च सुहृद्गणाश्च
तमर्थवन्तं पुनराश्रयन्ति, अर्थो हि लोके पुरुषस्य बन्धुः२०८
बुभुक्षितैर्व्याकरणं न भुज्यते, पिपासितैः काव्यरसो न पायते
नच्छन्दसा केनचिदुद्धृतंकुलं, हिरण्यमेवार्जयनिष्फलागुणाः
अंबा तुष्यति न मया, न स्नुषया सापि नांबया नमया
अहमपि नतया न तया, वद राजन् कस्य दोषोऽयम्२१०
अहो नु कष्टं सततं प्रवासः, ततोतिकष्टः परगेहवासः
कष्टाधिका नीच जनस्य सेवा,ततोऽतिकष्टा धनहीनताच २११
शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः
नीचो वदति न कुरुते, वदति न साधुः करोत्येव २१२
मृगमीनसज्जनानां, तृणजलसंतोषविहितवृत्तीनाम्
लुब्धकधीवरपिशुना, निष्कारण वैरिणो जगति २१३
विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय
खलस्य साधोर्विपरीतमेतत्, ज्ञानाय दानायच रक्षणाय. २१४
भिक्षो कन्था श्लथा ते, नहि शफरिवधे,जाल मश्नासि मत्स्यान्
ते वै मद्योपदंशाः पिबसि मधु समं, वेश्यया यासि वेश्याम् ?

दत्वांघ्रिमूर्ध्न्यरीणां, तव किमु रिपवो, भित्तिभेत्तास्मि येषाम्
चोरोऽसि? द्युत हेतोः, त्वयि सकलमिदं नास्ति नष्टे विचारः
बदनं दशनविहीनं, वाचो न परिस्फुटा गता शक्तिः
अव्यक्तेन्द्रियशक्तिः पुनरपि बाल्यं कृतं जरया २१७
अनुचितकर्मारंभः, स्वजनविरोधो बलीयसा स्पर्धा
प्रमदाजनविश्वासो, मृत्युद्वाराणि चत्वारि २१८
रोगी चिरप्रवासी, परान्नभोजी परावसथशायी
यज्जीवति तन्मरणं, यन्मरणं सोऽस्य विश्रामः २१९
इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः
तद्वत्सज्जनमैत्री, विपरीतानां च विपरीता २२०
गन्धः सुवर्णे फलमिक्षुदण्डे, नाकारि पुष्पं खलु चन्दनेषु
विद्वान्धनाढ्यो नतुदीर्घजीवी,धातुःपुरा कोऽपि नबुद्धिदोऽभूत्
दारेषु किंचित्स्वजनेषु किंचत्, गोप्यं वयस्येषु सुतेषु किंचित्
युक्तं नवा युक्तमिदं विचिन्त्य,वदेद्विपश्चिन्महतोऽनुरोधात्२२२
वने जले शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि२२३
सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेषा
अहं करोमीति वृथाभिमानः,स्वकर्मसूत्रग्रथितो हि लोकः २२४
वनेऽपि सिंहा मृगमांसभक्षिणो, बुभुक्षिता नैव तृणं चरन्ति

एवं कुलीना व्यसनाभिभूता,न नीच कर्माणि समाचरन्ति. २२५
पिबन्ति नद्यः स्वयमेवनांभः,स्वयं न खादन्ति फलानि वृक्षाः
नादन्ति सस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः
आज्ञा कीर्तिः पालनं सज्जनानां,दानं भोगो मित्रसंरक्षणं च
येषामेते षड्गुणा न प्रवृत्ताः,कोर्थस्तेषां पार्थिवोपाश्रयेण. २२७
सीदन्ति सन्तो विलसन्त्यसन्तः पुत्रा म्रियन्ते जनकश्चिरायुः
परेषु मैत्री स्वजनेषु वैरं,पश्यन्तु लोकाः कलि कौतुकानि.२२८
इतरकर्मफलानि यदृच्छया, विलिखितानि सहे चतुरानन
अरसिकेषु कवित्वनिवेदनम्,शिरसि मालिख मालिख मालिख
स्वायत्तमेकान्तगुणं विधात्रा, विनिर्मितं छादनमज्ञतायाः
विशेषतस्तत्त्वविदां समाजे, विभूषणं मौनमपंडितानाम् २३०
भोगा न भुक्ता वयमेव भुक्ता, स्तपो न तप्तं वयमेव तप्ताः
कालो न यातो वयमेव याता,स्तृष्णा न जीर्णा वयमेव जीर्णाः
अर्थागमो नित्यमरोगिता च, प्रियाच भार्या प्रियवादिनी च
वश्यश्च पुत्रोऽर्थकरी च विद्या,षड् जीवलोकस्य सुखानिराजन्.
आहारनिद्राभयमैथुनं च, सामान्यमेतत्पशुभिर्नराणाम्
धर्मोहि तेषामधिकोविशेषो,धर्मेणहीनाः पशुभिःसमानाः२३३
गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः
आस्वाद्यतोयाःप्रभवन्ति नद्यः,समुद्रमासाद्य भवन्त्यपेयाः२३४

न धर्मशास्त्रं पठतीति कारणं, न चापि वेदाध्ययनं दुरात्मनः
स्वभाव एवात्र तथातिरिच्यते, यथा प्रकृत्या मधुरं गवां पयः
सुजीर्णमन्नं सुविचक्षणःसुतः, सुशिक्षिता स्त्री नृपतिः सुसेवितः
सुचिन्त्य चोक्तं सुविचार्य यत्कृतम्. सुदीर्घकालेऽपि न याति
विक्रियाम् २३६

असंभवं हेममृगस्य जन्म, तथापि रामो लुलुभे मृगाय
प्रायः समापन्नविपत्तिकाले, धियोऽपि पुंसां मलिना भवन्ति
वरं वनं व्याघ्रगजेन्द्रसेवितं, जलेन हीनं बहुकंटकावृतम्
तृणानि शय्या परिधानवल्कलं, न बन्धुमध्ये धनहीनजीवनम्.
शास्त्राण्यधीत्यापि भवन्ति मूर्खा, यस्तुक्रियावान्पुरुषःस विद्वान्
सुचिन्तितं चौषधमातुराणां, न नाममात्रेण करोत्यरोगम् २३९
न स्वल्पमप्यध्यवसायभीरोः, करोति विज्ञानविधिर्गुणं हि
अन्धस्य किं हस्ततलस्थितोऽपि, प्रकाशयत्यर्थमिह प्रदीपः२४०
श्लाघ्यः स एको भुवि मानवानां, स उत्तमः सत्पुरुषः स धन्यः
यस्यार्थिनो वा शरणागता वा, नाशाभिभङ्गाद्विमुखाः प्रयान्ति.
अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं दैवहतं विनश्यति.
जीवत्यनाथोऽपि वने विसर्जितः, कृतप्रयत्नोऽपिगृहे न जीवति.
उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति देशिताः
अनुक्तमप्यूहति पण्डितोजनः, परेङ्गितज्ञानफला हि बुद्धयः२४२

तृणानि नोन्मूलयति प्रभञ्जनो, मृदूनि नीचैः प्रणतानि सर्वतः
समुच्छ्रितानेव तरून्प्रबाधते महान्महत्स्येव करोति विक्रमम्.
संचिन्त्य संचिन्त्य तमुग्रदण्डं, मृत्युं मनुष्यस्य विचक्षणस्य
वर्षाम्बुसिक्ताइव चर्मबन्धाःसर्वे प्रयत्नाःशिथिलीभवन्ति२४५
वनेऽपि दोषाःप्रभवन्ति रागिणां, गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः
अकुत्सिते कर्मणि यःप्रवर्तते, निवृत्तरागस्य गृहं तपोवनम्२४६
आत्मा नदि संयमतोयपूर्णा, सत्यावहा शीलतटा दयोर्मिः
तत्राभिषेकं कुरु पाण्डुपुत्र,नवारिणा शुध्यति चान्तरात्मा२४७
गुणी गुणं वेत्ति न वेत्ति निर्गुणो,बली बलं वेत्ति न वेत्ति निर्बलः
शुको वसन्तस्य गुणं न वायसः,करी चसिंहस्य बलंनमूषकः२४८
धनैर्निष्कुलीनाः कुलीना भवन्ति धनैरापदं मानवा निस्तरंति
धनेभ्यःपरोबांधवोनास्तिलोकेधनान्यर्जयध्वंधनान्यर्जयध्वम्
व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि
दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि २५०
अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं
आयुष्यं जललोलबिंदुचपलं फेनोपमं जीवितम्
धर्मं यो न करोति निन्दितमतिः स्वर्गार्गलोद्घाटनं

पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते २५१

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर २५२

कौशेयं कृमिजं सुवर्णमुपलादिन्दीवरं गोमयात्
पंकात्तामरसं शशांक उदधेर्गोपित्ततो रोचना
काष्टादग्निरहेः फणादपि मणिर्दूर्वापि गोरोमतः
प्राकाश्यं स्वगुणोदयेन गुणिनो यास्यन्ति किं जन्मना ? २५३

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो देहिनाम् २५४

उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवः
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संसेविताः
मन्त्राराधनतत्परेण मनसा नीताःश्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुंच माम् २५५

पंगो धन्यस्त्वमसि न गृहं यासि योर्थी परेषाम्
धन्योऽन्ध त्वं धनमदवतां नेक्षसे यन्मुखानि

श्लाघ्यो मूकत्वमपि कृपणं स्तौषि नार्थाशया यः
स्तोतव्यस्त्वं बधिर न गिरं यः खलानां शृणोषि २५६
दग्धं खाण्डवमर्जुनेन बलिना दिव्यैर्द्रुमैर्भूषितम्
दग्धा वायुसुतेन रावणपुरी लंका पुनः स्वर्णभूः
दग्धः पंचशरः पिनाकपतिना तेनापियुक्तं कृतं
दारिद्र्यं जनतापकारकमिदं केनापि दग्धं नहि २५७
दृश्यन्ते भुवि भूरि निम्बतरवः कुत्रापि ते चन्दनाः
पाषाणैः परिपूरिता वसुमती वज्रो मणिर्दुर्लभः
श्रूयन्ते करटारवाश्च सततं चैत्रे कुहूकूजितम्
तन्मन्ये खलसंकुलं जगदिदं छित्राः क्षितौ सज्जनाः २५८
जाडयं ह्रीमति गण्यते व्रतरुचौ दंभः शुचौ कैतवम्
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्सगुणिनां यो दुर्जनैर्नांकितः २५९
एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये
तेऽमी मानुषराक्षसाः परहितं स्वार्थायनिघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे २६०
कस्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयते

शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया
कस्मात्कष्टमिदं त्वया व्यवसितं मद्देहमांसाशिनः
प्रत्युत्पन्ननृमांसभक्षणधियः ते घ्नन्तु लोकानिति    २६१
गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिः
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रंच लालायते
वाक्यं नाद्रियते च बान्धवजनैर्भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रायते    २६२
दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनात्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात्
मैत्रीचाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम्    २६३
पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः
अक्षैश्चापि युधिष्ठिरेण रमता प्राप्तो ह्यनर्थः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते    २६४
यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनम्
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाऽधिकम्
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्    २६५

भग्नाशस्य करंडपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेवहि नृणां वृद्धौ क्षये कारणम् २६६
आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् २६७
मान्धाता स महीपतिः क्षितितलेलंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः
अन्येचापि युधिष्ठिरप्रभृतयो यावन्त एवाभवन्
नैकेनापि समं गता वसुमती मुंज त्वया यास्यति २६८
क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
सोढा दुःसहशीतवाततपनाःक्लेशान्न तप्तं तपः
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं
तत्तत्कर्मकृतं यदेव मुनिभिस्तैस्तैःफलैर्वंचितम् २६९
व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणीञ्छिरीषकुसुमप्रान्तेन संनह्यते
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते

नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः २७०
केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् २७१
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न तु धनं विद्याविहीनःपशुः २७२
दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम्
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः २७३
रेरे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वे तु नैतादृशाः
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः २७४
लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्

सौजन्यं यदि किं निजैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना २७५
तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यंब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान्
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान्गुणान्
कीर्ति पालय दुःखिते कुरु दया मेतत्सतां लक्षणम् २७६
पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकोप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
सद्बोधाद् द्रवति न दुष्ट हृदयं बोधस्य किं दूषणम् २७७
को लाभो गुणिसंगमः किमसुखं प्राज्ञेतरैः संगतिः
का हानिः समयच्च्युतिर्निपुणता का धर्मतत्त्वे रतिः
कः शूरो विजितेन्द्रियः प्रियतमा काऽनुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् २७८
आशानामनदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी
मोहावर्तसुदुस्तराऽतिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः २७९
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो

यावच्चैन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
न्संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः २८०

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम्
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् २८१

वरं मौनं कार्यं न च वचनमुक्तं यदनृतं
वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम्
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि
र्वरं भिक्षाशित्वं न च परधनास्वादनसुखम् २८२

विजेतव्या लंका चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो रणभुवि साहायश्च कपयः
तथाप्येको रामः सकलमवधीद्राक्षसकुलम्
क्रियासिद्धिः सत्वे भवति महतां नोपकरणे, २८३

यदा किंचिज्ज्ञोऽहं द्विपइव मदान्धः समभवम्
तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः
यदा किंचित् किंचित् बुधजनसकाशादवगतम
तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः २८४

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यंकशयनम्
क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः
क्वचित्कंथाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं नच सुखम् २८५
अवश्यंयातारश्चिरतरमुषित्वापि विषयाः
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून्
व्रजन्तः स्वातंत्र्याद्तुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति २८६
अजानन्माहात्म्यं पततु शलभो दीपदहने
समीनोप्यज्ञानाद्बडिशयुतमश्नातुपिशितम्
विजानन्तो प्येते वयमिहविपज्जालजटिलान्
न मुंचामः कामानहहगहनो मोहमहिमा २८७
क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः
जराजीर्णै रंगै र्नटइव वलीमण्डिततनु-
र्नरः संसारांते विशति यमधानीजवनिकाम् २८८
मही रम्या शय्या विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः
स्फुरद्दीपश्चन्द्रो विरतिवनितासंगमुदितः

सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव २८९
क्वचिद्वीणावादः क्वचिदपि च हाहेति रुदितं
क्वचिन्नारी रम्या क्वचिदपि जराजर्जरवपुः
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहो
न जाने संसारः किममृतमयः किं विषमयः २९०
शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहतास्तु नितरां सुहता भवन्ति
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं
प्रज्ञा कुलं च विभवं च यशश्च हन्ति २९१
हंसो न भाति बलिभोजनवृन्दमध्ये
गोमायु मण्डलगतो न विभाति सिंहः
जात्यो न भाति तुरगः खरयूथमध्ये
विद्वान्न भाति पुरुषेषु निरक्षरेषु २९२
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः २९३
जाड्यं धियो हरति सिंचति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिःकथय किं न करोति पुंसाम् २९४
यो नात्मजे नच गुरौ नच बन्धुवर्गे
दीने दयां न कुरुते नच भृत्यवर्गे
किं तस्य जीवितफलं हि मनुष्यलोके
काकोपि जीवति चिराय बलिं च भुंक्ते २९५
सर्पाः पिबन्ति पवनं नच दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालम्
संतोष एव पुरुषस्य परं निधानम् २९६
भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम्
वस्त्रं सुजीर्णशतखण्डमयी च कंथा
हाहा तथापि विषयान् न जहाति चेतः २९७
उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः
विकसति यदि पद्मं पर्वताग्रे शिलायाम्
न भवति पुनरुक्तं भाषितं सज्जनानाम् २९८
घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्

छिन्नं छिन्नं पुनरपि पुनः स्वादुचवेक्षुकाण्डम्
दग्धं दग्धं पुनरपि पुनः कांचनं कान्तवर्णम्
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम् २९९
वैद्या वदन्ति कफपित्तमरुद्विकारान्
ज्योतिर्विदो ग्रहगतिं परिवर्तयन्ति
भूताभिषंग इति भूतविदो वदन्ति
प्रारब्धकर्म बलवन्मुनयो वदन्ति ३००
भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य
कृत्स्नाच भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ३०१
नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव नच यत्नकृतापि सेवा
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ३०२
दाता न दापयति दापयिता न दत्ते
यो दानदापनपरो मधुरं न वक्ति
दानं च दापनमथो मधुरा च वाणी
त्रीण्यप्यमूनि खलु सत्पुरुषे वसन्ति ३०३

आरभ्यते न खलु विघ्नभयेन नीचैः
आरभ्य विघ्नविहता विरमन्ति मध्याः
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
आरब्धमुत्तमजना न परित्यजन्ति ३०४

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन
इति महति विरोधे वर्तमानेऽसमाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ३०५

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः
क्षान्त्याभीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ३०६

चेतोहरा युवतयः सुहृदोनुकूलाः
सद्बान्धवाः प्रणतिगर्भगिरश्च भृत्याः
गर्जन्ति दन्तिनिवहास्तरलास्तुरंगाः
संमीलने नयनयोर्न हि किंचिदस्ति ३०७

केचिद्वदन्ति धनहीनजनो जघन्यः
केचिद्वदन्ति गुणहीनजनो जघन्यः
व्यासो वदत्यखिलवेदपुराणविज्ञो

नारायणस्मरणहीनजनो जघन्यः ३०८
यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ३०९
पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान्प्रकटीकरोति
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ३१०
पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम्
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिताभिहिताभियोगाः ३११
मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकार श्रेणिभिः प्रीणयन्तः
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ३१२
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्

अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ३१३
गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पण्डितेन
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ३१४
कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः
कर्षन्ति भूरिविषयाश्च न लोभपाशै-
र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ३१५
स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम्
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्धि जघनं
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ३१६
व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम्
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ३१७
अपार संसार समुद्र मध्ये, निमज्जतो मे शरणं किमस्ति

गुरो कृपाळो कृपया वदैत,द्विश्वेशपादां बुजदीर्घ नौका ३१८
बद्धोहि कोयो विषयानुरागी, कोवा विमुक्तो विषये विरक्तः
कोवास्ति घोरो नरकः स्वदेह, स्तृष्णा क्षयःस्वर्ग पदंकिमस्ति.
संसार हृत्कस्तु निजात्म बोधः, को मोक्षहेतुः प्रथितः सएव
द्वारं किमेकं नरकस्य नारी, का स्वर्गदा प्राण भृता महिंसा३२०
शेते सुखंकस्तु समाधिनिष्ठो, जागर्तिकोवा सदसद्विवेकी
केशत्रवः संति निजेंद्रियाणि, तान्येव मित्राणि जितानिकानि.
कोवा दरिद्रोहि विशाल तृष्णः,श्रीमांश्च कोयस्य समस्तितोषः
जीवन्मृतो कस्तु निरुद्यमोयः, कावाऽमृतास्यात्सुखदानिराशा.
पाशोहि कोयो ममताभिधानः, संमोहयत्येव सुरेवकास्त्री
कोवा महांधो मदनातुरोयो, मृत्युश्चको यद्ययशःस्वकीयम् ३२३
कोवा गुरुर्योहि हितोपदेष्टा, शिष्यस्तु कोयो गुरुभक्त एव
कोदीर्घरोगो भव एव साधो, किमौषधं तस्य विचार एव ३२४
किंभूषणा द्भूषणमस्ति शीलं, तीर्थंपरं किंस्वमनो विशुद्धं
किमत्रहेयं कनकंचकान्ता, श्राव्यं सदा किंगुरुवेद वाक्यम्३२५
केहेतवो ब्रह्मगतेस्तु संति, सत्संगतिर्दान विचारतोषाः
केसन्ति संतोऽखिल वीतरागा, अपास्त मोहाःशिव तत्वनिष्ठाः
कोवा ज्वरः प्राणभृतांहि चिंता,मूर्खोस्ति कोयस्तु विवेकहीनः
कार्या मयाका परमात्म भक्तिः, किंजीवनंदोष विवर्जितंयत्.

विद्याहिका ब्रह्मगतिप्रदाया, बोधोहिं कोयस्तु विमुक्ति हेतुः
कोलाभ आत्मावगमा हियोवै, जितं जगत् केनमनोहियेन३२८
शूरान्महाशूरतमोस्ति कोवा, मनोज बाणैर्व्यथितो नयस्तु
प्राज्ञोऽतिधीरश्च समोस्ति कोवा प्राप्तोन मोहं ललना कटाक्षैः
विषाद्विषं किंविषयाःसमस्ता, दुःखी सदाको विषयानुरागी
धन्यास्ति कोयस्तु परोपकारी,कःपूजनीयो ननुतत्वनिष्ठः३३०
सर्वास्ववस्था स्वपिकिंन कार्यं,किंवा विधेयं विदुषांप्रयत्नात्
स्नेहश्च पापं पठनंच धर्मः, संसार मूळंहि किमस्ति चिंता३३१
विज्ञान्महा विज्ञतमोस्ति कोवा, नार्या पिशाच्या नचवंचितोयः
काशृंखळा प्राणभृतांच नारी,दिव्यंव्रतं किंचनिरस्त दैन्यं३३२
वासोनसंगः सहकैर्विधेयो, मूर्खैश्च पापैश्च खलैश्च नीचैः
मुमुक्षुणा किंचरितं विधेयं,सत्संगतिर्निर्ममतेशभक्तिः ३३३
मूकोस्ति कोवा बधिरश्च कोवा, युक्तं नवक्तुं समये समर्थः
तथ्यं सुपथ्यं न शृणोति वाक्यं,केदस्यवः संति कुवासनाख्याः
शत्रोर्महाशत्रुतरोस्ति कोवा, कामःस कोपानृतलोभ तृष्णः
नपूर्यतेको विषयैः सएव, किं दुःखमूळं ममताभिधानम्३३५
किंमंडनं साक्षरता मुखस्य, सत्यंच किंभूतहितं तदेव
त्यक्त्वा सुखं किंस्त्रियमेव सम्यक्,देयंपरं किंत्वभयंसदैव ३३६
कस्यास्तिनाशे मनसोहि मोक्षः,कसर्वथा नास्तिभयं विमुक्तौ

शल्यंपरं किंनिजमूर्खतैव, केकेउपास्या गुरुवश्च वृद्धाः३३७
बुद्ध्यानबुद्धं परिशिष्यते किं, शिवं प्रशांतं सुखबोधरूपम्
ज्ञातेतुकस्मिन्विदितं जगत्स्या,त्सर्वात्मके ब्रह्मणि पूर्णरूपे३३८
किंदुर्ल्लभं सद्गुरुरस्ति लोके, सत्संगति ब्रह्म विचारणाच
त्यागोहि सर्वस्य निजात्मबोधः,कोदुर्जयःसर्वजनैर्मनोजः३३९
पशोः पशुःकोनकरोति धर्मं, प्राधीत शास्त्रोपिनप्राप्तबोधः
जातोस्ति कोयस्य पुनर्नजन्म, कोवा मृतोयस्य पुनर्नमृत्युः
विद्युच्चलं किंधनयौवनायु, दानंपरं किंचसुपात्रदत्तं
कंठंगतैरप्यसुभिर्न कार्यं, किंवा विधेया विमला शिवार्चा३४१
कादुस्त्यजा सर्व जनैर्दुराशा, विद्याविहीनःपशुरस्तिकोवा
अहर्निशंकिंपरिचिन्तनीयं,संसारमिथ्यात्व शिवात्मतत्वे३४२
त्रिवर्गसंसाधनमंतरेण, पशोरिवायुर्विफलं नरस्य
तत्रापि धर्म्मं प्रवरं वदंति, न तं विना यद्भवतोऽर्थकामौ ३४३
यः प्राप्य दुःप्राप्यमिदं नरत्वं, धर्मं न यत्नेन करोति मूढः
क्लेशप्रबंधेन स लब्धमब्धौ, चिंतामणिं पातयति प्रमादात्.
स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते
पीयूषेण प्रवरकरिणं वाहयत्यैंधभारम्
चिंतारत्नं विकरति कराद्वायसोड्डायनार्थं
यो दुष्प्रापं गमयति मुधा मर्त्यजन्म प्रमत्तः ३४५

ते धत्तूरतरुं वपंति भवने प्रोन्मूल्य कल्पद्रुमं
चिंतारत्नमपास्य काचशकलं स्वीकुर्वते ते जडाः
विक्रीयं द्विरदं गिरींद्रसदृशं क्रीणंति ते रासभं
ये लब्धं परिहृत्य धर्म्ममधमा धावंति भोगाशया ३४६
अपारे संसारे कथमपि समासाद्य नृभवं
न धर्मं यः कुर्याद्विषयसुखतृष्णातरलितः
ब्रुडन् पारावारे प्रवरमपहाय प्रवहणं
स मुख्यो मूर्खाणामुपलमुपलब्धुं प्रयतते ३४७
मानुष्यं विफलं वदंति हृदयं व्यर्थं वृथा श्रोत्रयो-
र्निर्माणं गुणदोषभेदकलनां तेषामसंभाविनीम्
दुर्वारं नरकांधकूपपतनं मुक्तिं बुधा दुर्लभां
सार्वज्ञ: समयोदयारसमयो येषां न कर्णातिथिः ३४८
यदि ग्रावा तोये तरति तरणिर्यद्युदयते
प्रतीच्यां सप्तार्चिर्यदि भजति शैत्यं कथमपि
यदि क्ष्मापीठं स्यादुपरि सकलस्याऽपि जगतः
प्रसूते सत्त्वानां तदपि न वधः काऽपि सुकृतम् ३४९
आयुर्दीर्घतरं वपुर्वरतरं गोत्रं गरीयस्तरं
वित्तं भूरितरं बलं बहुतरं स्वामित्वमुच्चैस्तरम्
आरोग्यं विगतांतरं त्रिजगति श्लाघ्यत्वमल्पेतरम्

संसारांबुनिधिं करोति सुतरं चेतः कृपार्द्रांतरम् ३५०
विश्वासायतनं विपत्तिदलनं देवैः कृताराधनं
मुक्तेः पथ्यदनं जलाग्निशमनं व्याघ्रोरगस्तंभनम्
श्रेयःसंवननं समृद्धिजननं सौजन्यसंजीवनं
कीर्त्तेः केलिवनं प्रभावभवनं सत्यं वचः पावनम् ३५१
हरति कुलकलंकं लुंपते पापपंकं
सुकृतमुपचिनोति श्लाघ्यतामातनोति
नमयति सुरवर्ग्गं हंति दुष्टोपसर्गं
रचयति शुचिशीलं स्वर्गमोक्षौ सलीलम् ३५२
मायामविश्वासविलासमंदिरं, दुराशयो यः कुरुते धनाशया
सोऽनर्थसार्थं न पतंतमीक्षते, यथा बिडालो लगुडं पयः पिबन्.
वरं क्षिप्तः पाणिः कुपितफणिनो वक्त्रकुहरे
वरं झंपापातो ज्वलदनलकुंडे विरचितः
वरं प्रासप्रांतः सपदि जठरांतर्विनिहिता
न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषा ३५४
दायादाः स्पृहयंति तस्करगणा मुष्णन्ति भूमीभुजो
गृह्णंति च्छलमाकलय्य हुतभुग्भस्मीकरोति क्षणात्
अंभः प्लावयति क्षितौ विनिहतं यक्षा हरंति हठात्
दुर्वृत्तास्तनया नयंति निधनं धिग्बह्वधीनं धनम् ३५५

अवद्यमुक्ते पथि यः प्रवर्तते प्रवर्तयत्यन्यजनं च निस्पृहः
स एव सेव्यः स्वहितैषिणा गुरुः स्वयं तरंस्तारयितुं क्षमः परम्
न देवं नादेवं न शुभगुरुमेवं न कुगुरुं
न धर्मं ना धर्मं न गुणपरिणद्धं न विगुणम्
न कृत्यं ना कृत्यं नहितमहितं नापि निपुणं
विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः ३५७
असत्यमप्रत्ययमूलकारणं कुवासनासद्म समृद्धिवारणम्
विपन्निदानं परवञ्चनोर्जितं कृतापराधं कृतिभिर्विवर्जितम्
विधाय मायां विविधैरुपायैः परस्य ये वञ्चन माचरन्ति
ते वञ्चयन्ति त्रिदिवापवर्गसुखान्महामोहसखा स्वमेव ३५९
जातः कल्पतरु पुरः सुरगवी तेषां प्रविष्टा गृहे
चिन्तारत्नमुपस्थितं करतले प्राप्तो निधिः सन्निधिम्
विश्वं वश्यमवश्यमेव सुलभाः स्वर्गापवर्गश्रियः
ये संतोषमशेषदोषदहनध्वंसाम्बुदं बिभ्रते ३६०
भजभगवंतंभजभगवंतं भजभगवंतंमूढमते,
प्राप्तेसन्निहितेमरणे नहिनहिरक्षतिडुकृञ्करणे. भज. ३६१
बालस्तावत्क्रीडासक्त स्तरुणस्तावत्तरुणीरक्तः,
वृद्धस्तावच्चिंतामग्नः परेब्रह्मणिकोपिनलग्नः भज. ३६२
अंगंगलितंपलितंमुंडं दशनविहीनंजातंतुंडं,

वृद्धोयातिगृहीत्वादंडं तदपिनमुंचत्याशापिंडं. भज. ३६३
पुनरपिजननंपुनरपिमरणं पुनरपिजननीजठरेशयनं,
इहसंसारेखलुदुस्तारे कृपयाऽपारेपाहिमुरारे. भज. ३६४
दिनमपिरजनीसायंप्रातः शिशिरवसंतौपुनरायातः;
काल क्रीडतिगच्छत्यायु स्तदपिनमुंचत्याशावायुः भज.३६५
जटिलोमुंडितलुंचितकेशः काषायांबरबहुधृतवेषः,
पश्यन्नपिनचपश्यतिलोक उदरनिमित्तंबहुकृतशोकः भज.२६६
वयसिगतेकःकामविकारः शुष्केनीरेकःकासारः,
क्षीणेवित्तेकःपरिवारो ज्ञातेतत्वेकःसंसारः भज. ३६७
गेयंगीतानामसहस्त्रं ध्येयंश्रीपतिरूपमजस्त्रं,
नेयंसज्जनसंगतिचित्तं देयंदीनजनायचवित्तं भज. ३६८
कोहंकस्त्वंकुतआयातः कामेजननीकोमेतातः,
इतिपरिभावयसर्वमसारं सर्वंत्यक्त्वा स्वप्नविचारं. भज. ३६९
कातेकांताकस्तेपुत्रः संसारोयमतीवविचित्रः,
कस्यत्वंकःकुतआयात स्तत्वंचिंतयमनसिभ्रातः भज. ३७०
सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु, माकश्चिदुःखभाग्भवेत् ३७१